# Nagapatnibhih Kritam 3 Shri Krishna Stotram

# નાગપત્નીભિઃ કૃતં ૩ શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Nagapatnibhih Kritam 3 Shri Krishna Stotram

File name : nAgapatnIbhiHkRRitaM3shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/16/33-53||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# નાગપત્નીભિઃ કૃતં ૩ શ્રીકૃષ્ણસ્તોત્રમ્

નાગપત્ન્ય ઊચુઃ ।
ન્યાય્યો હિ દણ્ડઃ કૃતકિલ્બિષેઽસ્મિં-
સ્તવાવતારઃ ખલનિગ્રહાય ।
રિપોઃ સુતાનામપિ તુલ્યદૃષ્ટે-
ર્ધત્સે દમં ફલમેવાનુશંસન્ ॥ ૩૩॥

અનુગ્રહોઽયં ભવતઃ કૃતો હિ નો
દણ્ડોઽસતાં તે ખલુ કલ્મષાપહઃ ।
યદ્દન્દશૂકત્વમમુષ્ય દેહિનઃ
ક્રોધોઽપિ તેઽનુગ્રહ એવ સમ્મતઃ ॥ ૩૪॥

તપઃ સુતપ્તં કિમનેન પૂર્વં
નિરસ્તમાનેન ચ માનદેન ।
ધર્મોઽથ વા સર્વજનાનુકમ્પયા
યતો ભવાંસ્તુષ્યતિ સર્વજીવઃ ॥ ૩૫॥

કસ્યાનુભાવોઽસ્ય ન દેવ વિદ્મહે
તવાઙ્ઘ્રિરેણુસ્પર્શાધિકારઃ ।
યદ્વાઞ્છયા શ્રીર્લલનાચરત્તપો
વિહાય કામાન્ સુચિરં ધૃતવ્રતા ॥ ૩૬॥

ન નાકપૃષ્ઠં ન ચ સાર્વભૌમં
ન પારમેષ્ઠ્યં ન રસાધિપત્યમ્ ।
ન યોગસિદ્ધીરપુનર્ભવં વા
વાઞ્છન્તિ યત્પાદરજઃપ્રપન્નાઃ ॥ ૩૭॥

તદેષ નાથાપ દુરાપમન્યૈ-
સ્તમોજનિઃક્રોધવશોઽપ્યહીશઃ ।
સંસારચક્રે ભ્રમતઃ શરીરિણો

યદિચ્છતઃ સ્યાદ્વિભવઃ સમક્ષઃ ॥ ૩૮॥

નમસ્તુભ્યં ભગવતે પુરુષાય મહાત્મને ।
ભૂતાવાસાય ભૂતાય પરાય પરમાત્મને ॥ ૩૯॥

જ્ઞાનવિજ્ઞાનનિધયે બ્રહ્મણેઽનન્તશક્તયે ।
અગુણાયાવિકારાય નમસ્તે પ્રાકૃતાય ચ ॥ ૪૦॥

કાલાય કાલનાભાય કાલાવયવસાક્ષિણે ।
વિશ્વાય તદુપદ્રષ્ટ્રે તત્કર્ત્રે વિશ્વહેતવે ॥ ૪૧॥

ભૂતમાત્રેન્દ્રિયપ્રાણમનોબુદ્ધ્યાશયાત્મને ।
ત્રિગુણેનાભિમાનેન ગૂઢસ્વાત્માનુભૂતયે ॥ ૪૨॥

નમોઽનન્તાય સૂક્ષ્માય કૂટસ્થાય વિપશ્ચિતે ।
નાનાવાદાનુરોધાય વાચ્યવાચકશક્તયે ॥ ૪૩॥

નમઃ પ્રમાણમૂલાય કવયે શાસ્ત્રયોનયે ।
પ્રવૃત્તાય નિવૃત્તાય નિગમાય નમો નમઃ ॥ ૪૪॥

નમઃ કૃષ્ણાય રામાય વસુદેવસુતાય ચ ।
પ્રદ્યુમ્નાયાનિરુદ્ધાય સાત્વતાં પતયે નમઃ ॥ ૪૫॥

નમો ગુણપ્રદીપાય ગુણાત્મચ્છાદનાય ચ ।
ગુણવૃત્ત્યુપલક્ષ્યાય ગુણદ્રષ્ટ્રે સ્વસંવિદે ॥ ૪૬॥

અવ્યાકૃતવિહારાય સર્વવ્યાકૃતસિદ્ધયે ।
હૃષીકેશ નમસ્તેઽસ્તુ મુનયે મૌનશીલિને ॥ ૪૭॥

પરાવરગતિજ્ઞાય સર્વાધ્યક્ષાય તે નમઃ ।
અવિશ્વાય ચ વિશ્વાય તદ્દ્રષ્ટ્રેઽસ્ય ચ હેતવે ॥ ૪૮॥

ત્વં હ્યસ્ય જન્મસ્થિતિસંયમાન્ પ્રભો
ગુણૈરનીહોઽકૃતકાલશક્તિધૃક્ ।
તત્તત્સ્વભાવાન્ પ્રતિબોધયન્ સતઃ
સમીક્ષયામોઘવિહાર ઈહસે ॥ ૪૯॥

તસ્યૈવ તેઽમૂસ્તનવસ્ત્રિલોક્યાં
શાન્તા અશાન્તા ઉત મૂઢયોનયઃ ।
શાન્તાઃ પ્રિયાસ્તે હ્યધુનાવિતું સતાં

સ્થાતુશ્ચ તે ધર્મપરીપ્સયેહતઃ ॥ ૫૦॥

અપરાધઃ સકૃદ્ભર્ત્રા સોઢવ્યઃ સ્વપ્રજાકૃતઃ ।
ક્ષન્તુમર્હસિ શાન્તાત્મન્ મૂઢસ્ય ત્વામજાનતઃ ॥ ૫૧॥

અનુગૃહ્ણીષ્વ ભગવન્ પ્રાણાંસ્ત્યજતિ પન્નગઃ ।
સ્ત્રીણાં નઃ સાધુશોચ્યાનાં પતિઃ પ્રાણઃ પ્રદીયતામ્ ॥ ૫૨॥

વિધેહિ તે કિઙ્કરીણામનુષ્ઠેયં તવાજ્ઞયા ।
યચ્છ્રદ્ધયાનુતિષ્ઠન્ વૈ મુચ્યતે સર્વતોભયાત્ ॥ ૫૩॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે પૂર્વાર્ધે ષોડશાધ્યાયાન્તર્ગતં
નાગપત્નીભિઃ કૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૧૬/૩૩-૫૩ ॥

bhAgavatapurANa . adhyAya 10/16/33-53..

Proofread by PSA Easwaran

*Nagapatnibhih Kritam 3 Shri Krishna Stotram*
pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*